**MP BOARD CLASS 10 SANSKRIT GENERAL MODEL PAPER SET 5 2020**

म.प्र. बोर्ड कक्षा 10 संस्कृत (सामान्य) मोडल पेपर सेट 5 2020

समय-3 घण्टे पूर्णांक-100

निर्देशः- (i) सर्वे प्रश्नाः अनिवार्यः सन्ति । 1x5=5

(ii) प्रश्नानां सम्मुखे निर्धारिताः अङ्काः प्रदत्ताः।

प्रश्न 1. उचित विकल्पं चित्वा लिखत-

(क)"महौषधिः" इत्यस्य पदस्य संधिविच्छेदः अस्ति

(अ) महो + ओषधिः (ब) महा + औषधिः (स) महे + औषधिः (द) महे + ओषधिः ।

(ख) देवेन्द्रः' इत्यस्मिन् पदे सन्धिः अस्ति

(अ) यण् (ब) वृद्धिः (स) अयादिः (द) गुणस्वरसन्धिः ।

(ग) 'व्यञ्जनसन्धेः' उदाहरणम् अस्ति-

(अ) शिवालयः (ब) देवालयः (स) सदाचारः (द) सदैव।

(घ) अति + आचारः' इत्यस्य सन्धिः अस्ति-

(अ) अतिआचारः (ब) अत्यचारः (स) अत्याचारः (द) अतीचारः।

(ङ) अधोलिखितेषु अव्ययम् नास्ति-

(अ) यदा (ब) कदा (स) पता (द) तदा।

उत्तर-(क) (ब), (ख) (द), (ग) (स), (घ) (स), (ङ) (स)।

प्रश्न 2. उचित विकल्पं चित्वा लिखत- 1×5=5

(क) 'महापुरुषः' इत्यस्मिन् पदे समासः अस्ति-

(अ) द्विगुः (ब) कर्मधारयः (स) द्वन्द्वः (द) तत्पुरुषः।

(ख) बहुब्रीहिः समासस्य उदाहरणम् अस्ति-

(अ) उपकृष्णं (ब) चंद्रशेखरः (स) पञ्चवटी (द) हरिहरौ।

(ग) 'बाणहतः' इत्यस्मिन् पदे समास विग्रहः अस्ति-

(अ) बाणं हतः (ब) बाणेन हतः (स) बाणात् हतः (द) बाणे हतः।

(घ) 'अधिकारः' इत्यस्मिन पदे उपसर्गः अस्ति-

(अ) अध (ब) अधिक (स) अ (द) अधि।

(ङ) अधोलिखितेषु उपसर्गः अस्ति-

(अ) सम् (ब) वद् (स) अस् (द) वस्।

उत्तर-(क) (ब), (ख) (ब), (ग) (ब), (घ) (द), (ङ) (अ)।

प्रश्न 3. उचित विकल्पं चित्वा लिखत्(क) द्रक्ष्यामि' इत्यस्मिन् पदे लकारः अस्ति- 1x5=5

(अ) लट् (ब) लृट् (स) लङ्ग (द) लोट।

(ख) 'गच्छ' इत्यस्मिन् पदे पुरुषः अस्ति-

(अ) प्रथमपुरुषः (ब) मध्यमपुरुषः (स) उत्तमपुरुषः (द) तृतीयपुरुषः।

(ग) 'गच्छानि' इत्यस्मिन् पदे वचनम् अस्ति-

(अ) एकवचनम् (ब) द्विवचनम् (स) बहुवचनम् (द) अन्यवचनम्।

(घ) लभन्ते' इत्यस्मिन् पदे धातुः अस्ति(अ) लब् (ब) लभ (स) लाभ

(द) लभन्। (ङ) विद्या माता इव रक्षति' इत्यस्मिन् वाक्ये अव्ययम् अस्ति-

(अ) विद्या (ब) माता (स) इव (द) रक्षति।

उत्तर-(क) (ब), (ख) (ब), (ग) (अ), (घ) (ब), (ङ) (स)।

प्रश्न 4. उचित विकल्पं चित्वा लिखत- 1x5=5

(क) शक्तिमान्' इत्यस्मिन् पदे प्रत्ययः अस्ति-

(अ) क्तवतु (ब) शानच् (स) मतुप् (द) शतृ।

(ख) कथितः' इत्यस्मिन् पदे प्रत्ययः अस्ति-

(अ) क्त (ब) क्तवतु (स) क्त्वा (द) ल्यप्।

(ग) 'अनीयर' प्रत्ययस्य उदाहरणम् अस्ति-

(अ) स्मरणीयम् (ब) पठितव्यं (स) दत्वा (द) गतः।

(घ) अजा' इत्यस्मिन् पदे प्रत्ययः अस्ति-

(अ) टाप् (ब) जाप (स) आप् (द) शाप।

(ङ) परोपकारः ................ प्राणैः कण्ठगतैरपि

(अ) हर्त्तव्यः (ब) गन्तव्यः (स) कर्त्तव्यः (द) कृतः।

उत्तर-(क) (स), (ख) (अ), (ग) (अ), (घ) (अ), (ङ) (स)।

प्रश्न 5. प्रदत्तैः शब्दैः रिक्त स्थान पूर्तिं कुरुत (कोऽपि पञ्च) 1x5=5

(सप्तहोता, यशः, तनयं, आत्मा, लघुत्वं, वारिधरैः)

(क) महर्षिः .................... शरीरेण अमरः अस्ति।

(ख) प्रक्रीडितो ............... सुरेन्द्रः ।

(ग) येन यज्ञस्तायते ................. ।

(घ) पितरौ अपि एतादृशं ............... नाभिनन्दतः।।

(ङ) सर्वेषु शरीरेषु .............. एक एव।

(च) परसदननिविष्टः को .............. न याति।

उत्तर-(क) यशः, (ख) वारिधरैः, (ग) सप्तहोता, (घ) तनयं, (ङ) आत्मा, (च) लघुत्वं ।

प्रश्न 6. अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत- 2x3 =6

1. संस्कृतभाषा कस्य पोषणं करोति।

2. वर्षाकाले धरणी कैः वितृप्ता भवति?

3. रथकारः पर्वत देशे किमर्थ गतः?

4. कं न भिन्द्यात् ?

5. छिन्नोऽपि चन्दनतरुः किं त्यजति ?

प्रश्न 7. अधोलिखितेषु द्वयोः शब्दयोः शब्दरूपाणि त्रिषुवचनेषु लिखत- 2

1. तत् (पुल्लिंग) - चतुर्थी विभक्तिः

2. नामन् - तृतीया विभक्तिः

3. अस्मद् - सप्तमी विभक्तिः।

प्रश्न 8. "नामभ्यः" अथवा "पित्रा" इति पदस्य विभक्तिं वचनं च लिखत- 2

प्रश्न 9. अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत- 5x2 = 10

(क) जनाः द्विधा समयस्य दुरुपयोगं कुर्वन्ति व्यर्थपयापनेन अकार्यकरणेन च अनेकेजनाः कार्य सम्पादने समर्था अपि निरर्थकं समयं यापयन्ति । इतो भ्रमन्ति ततो भ्रमन्ति अप्रयोजनम् गृहे गृहे अटन्ति।न ते स्वार्थाय एव किञ्चित् कार्यं कुर्वन्ति न वा परार्थाय एव। देवदुर्लभमिदं मानव शरीरं लब्ध्वापि ये न अध्ययनं कुर्वन्ति न धर्मम् आचरन्ति न धनम् उपार्जयन्ति न वा मुक्तये प्रयासं कुर्वन्ति तेषां जन्म निरर्थकं भवति तथा इयं कर्मभूमि एतादृशानां निष्क्रियाणां भारं वोढुं नेच्छति।

प्रश्नाः- 1. जनाः समयस्य दुरुपयोगं कथं कुर्वन्ति ?

2. अनेके जनाः कस्मिन् समर्थाः अपि निरर्थकं समयं या पयन्ति ?

3. मानव शरीरं कीदृशं अस्ति?

4. इयं कर्मभूमि केषां भारं वोदं न इच्छति?

5. स्वार्थाय इति पदस्य विपरीतार्थकः पदः लिखत।

(ख) कस्मिंश्चित् ग्रामे एकः प्राचीनः विशालः च न्यग्रोधवृक्षः आसीत्। सः पशुपक्षिभ्यः बहुविधेभ्यः जीवजन्तुभ्यः मनुष्येभ्यः अपि नित्यं बहूपकारकः आसीत्। पथिकाः तस्य वक्ष्य छायायां पाथेयं भक्षयित्वा मार्गायासं परिहरन्ति स्म। पशवः छायार्थं वृक्षमिमम् आश्रयन्ति स्म। पक्षिणः तस्य शाखासु नीडानि विरच्य वसन्ति स्म। सर्पाश्च तत्रत्येषु वल्मीकेषु वासं कुर्वन्ति स्म। एवं स वृक्षः सर्वप्रियः सर्वहितः सर्वापेक्षितः च आसीत्।

प्रश्नाः-1. न्यग्रोधवृक्षः कुत्र आसीत् ?

2. के मार्गायासं परिहरन्ति स्म ?

3. पशवः छायार्थं कुत्र आश्रयन्ति ?

4. 'विरच्य' शब्दस्य 'धातु' प्रत्ययं च पृथक् कुरुतः।

5. 'ग्राम' शब्दे का विभक्तिः अस्ति ।

(ग) तस्मिन् काले भूलोके गङ्गा न आसीत्। आकाश मार्गे तस्याः प्रवाहं सोढुं भूमिः शक्ता न आसीत्। तां प्रथमतः गृहीतुं परमेश्वरः एव शक्तः आसीत्। तस्मात् ईश्वरं ध्यात्वा भागीरथः तपः कृतवान्। सहस्त्र वर्षान्तरं एव ईश्वरः आकाशगङ्गां स्वजटासु गृहीतुम् अङ्गीकारं दत्तवान्। एवं सा नदी ईश्वरस्य जटासु प्रथम पतितवती । आकाशगङ्गा तदा गर्विता आसीत्। "कथम् एषः ईश्वरः मांधारयितुंशक्तः?" इति चिन्ततवती।नद्याः गर्वं ज्ञात्वा शिवः तां जटासुएव निक्षिप्तवान्। अतः नद्या एकः जल बिन्दुः अपि बहिः भूमौ न पतितः ।

प्रश्नाः-1. तस्मिन् काले भू लोके का न आसीत् ? http://www.mpboardonline.com

2. आकाशमार्गे तस्याः प्रवाहं सोढुं का शक्ता न आसीत् ?

3. कः तपः कतवान् ?

4. सा नदी कस्य जटासु प्रथम पतितवती?

5. 'ज्ञात्वा' इत्यस्य पदस्य प्रकृति प्रत्ययं च पृथक्कुरुत?

प्रश्न 10. अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत-

5x2=10

(क) केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः,

न स्नानं न विलेपनं न कुसुमं नालङ्कता मूर्धजाः।

वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते,

क्षीयन्ते खलु, भूषणानि सततं वाग्भूषणं भूषणम्।।

प्रश्नाः-1. चन्द्रोज्ज्वलाः हाराः किं न विभूषयन्ति ?

2. वाण्येका पुरुषं किं करोति ?

3. कानि खलु क्षीयन्ते?

4. सततं भूषणं किम् ?

5. सततं इति शब्दस्य समानार्थी पदं लिखत।

(ख) दरिद्रता धीरतया विराजते, कुवस्त्रता शभ्रतया विराजते।

कदन्नता चोष्णतया विराजते, करूपता शीलतया विराजते।

प्रश्नाः-1. दरिद्रता कया विराजते ?

2. कदन्नता कया विराजते ?

3. कुरूपता कया विराजते ?

4. शीलतया का विराजते?

5. 'दरिद्र' इतस्य पदस्य पर्याय शब्दम् लिखत।

(ग) प्रारभ्यते न खलु विघ्नभयेन नीचैः।

प्रारभ्य विघ्नविहता विरमन्ति मध्याः।

विजैः पुनः पुनरपि प्रतिहृन्य मानाः

प्रारभ्य चोत्तम जनाः न परित्यजन्ति॥

प्रश्नाः-1. कैः विघ्नभयेन कार्य न प्रारभ्यते ?

2. मध्याः कदा विरमन्ति ?

3. के कार्य प्रारभ्य न परित्यजन्ति ?

4. कैः हृन्यमानापि कार्य न परित्यजन्ति ?

5. 'पुनरपि' इत्यस्य पदस्य संधि विच्छेदं कुरुत।

प्रश्न 11. युग्ममेलनं कुरुत (कोऽपि चत्वारः) 4

| 'अ' | 'ब' |
|---|---|
| 1. कौत्सः | (क) दानी |
| 2. वरतन्तु | (ख) पृथिवीम् |
| 3. रघुः | (ग) धनदेवः |
| 4. कुबेरः | (घ) गुरुदक्षिणार्थी |
| 5. ग्राम | (ङ) गुरुः। |

उत्तर- 1. (घ), 2. (ङ), 3. (क), 4. (ग), 5. (ख)।

प्रश्न 12. शुद्धवाक्यानां समक्षं 'आम्' अशुद्ध वाक्यानां समक्षं 'न' इति लिखत- 4

1. प्रवासिन् नराः स्वदेशान् यान्ति। http://www.mpboardonline.com

2. मे मनः शिवसङ्कल्पं न अस्तु।

3. दानेन परोऽपि बन्धुत्वभुपैति।

4. ब्राह्मणी पितृमात्रधर्मिणी आसीत्।

5. सर्वकाल विचारी न भवेत्।

उत्तर- 1. आम्, 2. न, 3. आम्, 4. आम्, 5. आम्।

प्रश्न 13. अधोलिखितेषु प्रश्नेषु चतुर्णाम् प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकपदेन लिखत- 4

1. जनाः प्रतिदिनं कं स्मरन्ति स्म?

2. भारतस्य पुरातनः सखाः कः विद्यते?

3. 'सुबाहुः कस्य पुत्र आसीत् ?

4. छत्रसालः कस्य शिष्यः आसीत् ?

5. अनर्घशीलः कः?

प्रश्न 14. प्रश्नपत्रे समागतान् श्लोक विहाय स्वपाठ्यपुस्तकस्य सुभाषित द्वयं लिखत- 4

प्रश्न 15. स्वप्राचार्यस्य स्थानांतरण प्रमाण पत्रार्थ एकं पत्रं संस्कते लिखत। 4

अथवा

स्वस्थ मित्रस्य कृते अध्ययनं वर्णयेन एकं पत्रं संस्कृते लिखत।

प्रश्न 16. अधोलिखितेषु "पञ्च" अशुद्धकारक वाक्यानाम् शुद्धि करणीया- 5

1. अहं पाठशालां गच्छामः।

2. सीता रामस्य सह वनं गता।

3. मम् दुग्धं रोचते।

4. वृक्षेण पत्राणि पतन्ति।

5. रामः सर्प विभेति।

6. त्वं कुत्र गच्छति।

7.सर्वः बालकाः गच्छन्ति।

प्रश्न 17. अधोलिखित वाक्यानाम् कथानुसारेण क्रम संयोजनं कुरुत- 5

1. अतः अस्योपीर ममैव अधिकारः वर्तते।

2. ग्रामे एकः प्राचीनः विशालः न्योधवृक्षः आसीत।।

3. इदं भदीयः वृक्षः इति काकस्य ध्वनि अन्तरिक्षं अस्पशन।

4. तस्य शाखायाम् एकः काकः वसन्नासीत् ।

5. अहं अस्मिन चिरात वसामि।

6. हे बन्धवः श्रूयतां मे वचः।

प्रश्न 18. अधोलिखितम् अपठित गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत- 5

स्वस्थ शरीरे एव स्वस्था बुद्धिः वसति। स्वस्था बुद्धिः एवं स्वस्थ विचाराणां जननी अस्ति। व्यायामशील: मनुष्य एव निरोग: चिरंजीवी च भवति। व्यायामशीला: मनुष्याः प्रायेण रुग्णाः न भवन्ति । विविध रोगाणां चिकित्सा अपि व्यायामेन सम्भवति। अतः जीवनस्य कृते व्यायामः परमावश्यकः।

प्रश्ना:-1. उपर्युक्त गद्यांशस्य उचित शीर्षकं लिखत।

2. स्वस्था बुद्धिः कुत्र वसति ?

3. कः एव निरोगः?

4. विविध रोगाणां चिकित्सा केन सम्भवति?

5.स्वस्थ विचाराणां जननी का अस्ति?

प्रश्न 19. अधोलिखितेषु एकं विषयं स्वीकृत्य शत-शब्देषु संस्कृतभाषायाम् निबंध लिखत- 10

1.मम् दिनचर्या, 2. उत्सवः, 3. संस्कृतभाषायाः महत्वम्, 4. अनुशासनम्।